तुम्बुरुः, पुं स्त्री, गन्धर्व्वविशेषः । स्वर्गगायकः । इति जटाधरः ॥ (यथा, महाभारते । १।१२३।५५ ।
"गन्धर्व्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः ॥"
तपस्विविशेषः । यथा, हरिवंशे । १२६ । ६ ।
"अर्च्चिष्मांस्तुम्बुरुश्चैव भारिश्च वदतां वरः ।
नेतारौ देवदेवानामेते हि तपसान्विताः ॥")
अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥ फलवृक्षविशेषः । तत्फलन्तु धान्यसुखं मरीचवत् । तत्पर्य्यायः । शूलहः २ । इति रत्नमाला ॥ सौरजः ३ सौरः ४ वनजः ५ सानुजः ६ द्विजः ७ तीक्ष्णवल्कः ८ तीक्ष्णफलः ९ तीक्ष्णपत्रः १० महामुनिः ११ स्फुटलः १२ सुगन्धिः १३ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातशूलगुल्मोदराध्मानक्रिमिनाशित्वम् । वह्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥ तद्वृक्षपर्य्यायास्तत्फलगुणाश्च ।
"तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्धकः ।
तुम्बुरु प्रथितं तिक्तं कटुपाके हि तत् कटु ॥
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ।
वातश्लेष्मातिकर्णोष्ठशिरोरुग्गुरुताक्रमीन् ॥
कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥"
इति भावप्रकाशः ॥

तुर, लि र वेगे । इति कविकल्पद्रुमः ॥ (ह्रां-परं-अकं-सेट् ।) ह्रस्वी । लि, तुतोर्त्ति । र, वैदिकः । वेगः शीघ्रगमनम् । अदादिवर्ज्ज-धातुभ्यः श्नपो विधानेनैव सिद्धे अदादेः श्नपं विधाय तस्य लुकूकरणं निष्ठायां भावादिटि वोदुडो-ऽब्वत इत्यनेन गुणार्थमिति चतुर्भुजः । तेन तोरितं तुरितमिति । तन्मते रुदेरपि रोदितं रुदितमिति स्यात् । इति दुर्गादासः ॥

तुरः, त्रि, (तुतोर्त्ति वेगेन गच्छतीति । तुर+कः ।) वेगवान् । इति तुरगशब्दटीकायां भरतः ॥ (यथा, ऋग्वेदे । ७ । ५६ । १९ ।
"इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ॥"
"तुरं कर्म्मसु क्षिप्रवन्तम् ।" इति सायनः ॥
क्षिप्रस्तोत्रकारी । यथा, ऋग्वेदे । ८।२६।४ ।
"उपस्तोमान्तुरस्य दर्शथः श्रिये ॥"
"तुरस्य क्षिप्रं स्तोत्रं कुर्व्वतः ।"
इति सायनः ॥)

तुरगः, पुं, (तुर वेगे+भावे घञर्थे कः । तुरेण वेगेन गच्छतीति । गम+अन्येष्वपीति डः ।) चित्तम् । घोटकः । इति मेदिनी । गे, ३८ ॥ (यथा, रघुः । ३ । ५१ ।
"ततः प्रहस्यापभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता ॥")

तुरगगन्धा, स्त्री, (तुरगस्य गन्ध इव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अश्वगन्धाशब्देऽस्या विवरणमाज्ञातम् ॥)

तुरगब्रह्मचर्य्यकं, क्ली, (तुरगस्येव ब्रह्मचर्य्यम् । ततः स्वार्थे कन् ।) अभावादङ्गनात्यागः । इति त्रिकाण्डशेषः ॥

तुरगलीलकः, पुं, (तुरगस्येव लीला यस्य ततः कन् ।) तालप्रभेदः । यथा, सङ्गीतदामोदरः ।
"इतद्वन्द्वं विरामान्तं लघुस्तुरगलीलके ॥"

तुरगी [न्] त्रि, (तुरगो घोटको वाहनत्वेना-स्त्यस्येति । तुरग+इनिः ।) अश्वारोहः । इति हेमचन्द्रः । ३ । ४२५ ॥

तुरगी, स्त्री, (तुरगवत् गन्धोऽस्त्यस्याः । अर्श आदित्वात् अच् ततो गौरादित्वात् ङीष् ।) अश्वगन्धा । इति मेदिनी । गे, ३८ ॥ अश्वस्त्री । इति व्याकरणम् ॥

तुरङ्गः, पुं स्त्री, (तुरेण वेगेन गच्छतीति । तुर+गम+"गमे सुपि वाच्यः ।" ३ । २ । ३८ । इत्यस्य वार्त्तिकोक्त्या खच् । "खच्च डिद्वा वाच्यः ।" इति डित् । "अरुर्द्विषदिति ।" ६ । ३ । ६७ । इति मुम् ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥ (यथा, पञ्चतन्त्रे । १ । ३१४ ।
"मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः ॥")
चित्तम् । इति शब्दरत्नावली ॥

तुरङ्गकः, पुं, (तुरङ्ग इव कायतीति । कै+कः ।) घोषकाकृतिः । इति रत्नमाला ॥ हस्तिघोषा इति ख्यातः ॥

तुरङ्गद्वेषणी, स्त्री, (द्विष भावे ल्युट् । तुरङ्गेन सह द्वेषणं शत्रुता यस्य । ततो ङीप् ।) घोटकेन सह स्वभाववैरिभावात्तथात्वम् ।) महिषी । इति राजनिर्घण्टः ॥ (तुरङ्गद्विषणी तुरङ्गद्वेषिणी इत्यपि च क्वचिद् दृश्यते ॥)

तुरङ्गप्रियः, पुं, (तुरङ्गाणां घोटकानां प्रियः ।) यवः । इति राजनिर्घण्टः ॥

तुरङ्गमः, पुं, स्त्री, (तुरेण वेगेन गच्छतीति । गम+खच्+मुम् च ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥ (यथा, रघुः । ७ । ४७ ।
"तुरङ्गमस्कन्धनिषण्णदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥")

तुरङ्गवक्त्रः, पुं, (तुरङ्गस्येव वक्त्रं वदनं यस्य ।) किन्नरः । इति जटाधरः ॥

तुरङ्गवदनः, पुं, (तुरङ्गस्येव वदनं यस्य ।) किन्नरः । इत्यमरः । १ । २ । ७४ ॥

तुरङ्गारिः, पुं, (तुरङ्गस्य अरिः शत्रुः । अश्वनाशकत्वादस्य तथात्वम् ।) करवीरः । इति रत्नमाला ॥

तुरङ्गिका, स्त्री, (तुरङ्गवत् आकृतिरस्त्यस्य फलादौ । तुरङ्ग+ठन् ।) देवदालीलता । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या देवदालीशब्दे ज्ञातव्याः ॥)

तुरङ्गी, स्त्री, (तुरङ्गसदृगन्धोऽस्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति शब्दरत्नावली ॥ घोटिकाश्वस्त्री । इति राजनिर्घण्टः ॥

तुरायणः, त्रि, (तुरेण वेगेन अयनं यत्र । "पूर्व्वपदात् संज्ञायामगः ।" ८।४।३ । इति णत्वम् ।) परायणः । इत्यमरटीकायां स्वामी ॥ (क्ली, यज्ञविशेषः । इति सिद्धान्तकौमुदी ॥ यथा, कात्यायनश्रौतसूत्रे । २४ । ८ । १ । २ ।
"तुरायणं वैशाखपक्षस्याम् । चैत्रस्य वा ॥"
यथा, महाभारते । १३ । १०३ । ३५ ।
"तुरायणं हि व्रतमप्यधृष्य-
मक्रोधनोऽकरवं त्रिंशतोऽब्दान् ॥")

तुराषाट्, [ह्] पुं, (तुरं वेगवन्तं साहयति अभिभवतीति । सह+णिच्+क्विप् । "सहेः षाडः सः ।" ८ । ३ । ५६ । इति षत्वम् । अन्येषामपीति पूर्व्वपदस्य दीर्घः ।) इन्द्रः । इत्यमरः । १ । १ । ४७ ॥ अस्य रूपान्तरम् । तुराषाड् ॥ (यथा, देवीभागवते ।२।११।६३ ।
"तुराषाडपि तच्छ्रुत्वा क्रोधयुक्तो बभूव ह ॥")

तुरिः, स्त्री, (तुतोर्त्ति इतं गच्छतीति । तुर+इन् ।) तुरी । इति शब्दरत्नावली ॥

तुरी, स्त्री, (तुरि+कृदिकारादिति वा ङीष् ।) तन्तुवायस्य काष्ठनिर्म्मितोपकरणविशेषः । तत्पर्य्यायः । तन्त्रकाष्ठम् २ तुलिः ३ तुली ४ तुरिः ५ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ४४३ ।
"मेदिन्यां तव निपतति न पदं बहुवल्लभेति गर्व्वेण ।
घटिस्य केन तरुणैस्तुरीव वसनैर्विमुक्तासि ॥")

तुरीयं, क्ली, (चतुर्णां पूरणम् । चतुर्थस्थानस्थितत्वादस्य तथात्वम् ।) ब्रह्म । इति वेदान्तसारः ॥
"अज्ञानतदुपहितचैतन्ययोराधारभूतं अनुपहितचैतन्यम् । यथा । वनवृक्षतदवच्छिन्ना-काशयोर्जलजलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते । शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते । इत्यादि श्रुतेः ।" इति वेदान्तसारः ॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"तुरीयातीतसंन्यासपरिव्राजाक्षमालिका ॥")

तुरीयः, त्रि, (चतुर्णां पूरणः । चतुर्+"चतुरश्छयतावाद्यक्षरलोपश्च ।" ५ । २ । ५१ । इत्यस्य वार्त्तिकोक्त्या छः । चस्य लोपश्च ।) चतुर्थः । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । १ । १६ । ८ ।
"जाग्रत् स्वप्नसुषुप्तिश्च तव राजन्! भवन्ति हि ।
अवस्थास्तु यथाकालं तुरीया तु कथं नृप ! ॥"
तारकः । इति सायनः ॥ यथा, ऋग्वेदे । ३ । ४ । ९ ।
"तन्नस्तुरीयमध पोषयित्नु
देव त्वष्टर्वि रराणः स्यस्व ॥")

तुरीयवर्णः, पुं, (तुरीयश्चतुर्थो वर्णः ।) शूद्रः । इति हलायुधः ॥

तुरुष्कः, पुं, गन्धद्रव्यभेदः । शिलारस इति ख्यातः । तत्पर्य्यायः । यवनः २ धूम्रः ३ धूम्रवर्णः ४ सुगन्धिकः ५ सिह्लकः ६ सिह्लसारः ७ पीतसारः ८ कपिः ९ पिण्याकः १० कपिजः ११ कल्कः १२ पिण्डितः १३ पिण्डितैलकः १४ करेवरः १५ कृत्रिमकः १६ लेपनः १७ सिह्लः